Downloaded from https:// www.studiestoday.com

सुरभिः

कक्षा – 6

सत्र 2019–20

DIKSHA एप कैसे डाउनलोड करें?

विकल्प 1 : अपने मोबाइल ब्राउज़र पर diksha.gov.in/app टाइप करें।

विकल्प 2 : Google Play Store में DIKSHA NCTE ढूंढ़े एवं डाउनलोड बटन पर tap करें।

DIKSHA

मोबाइल पर QR कोड का उपयोग कर डिजिटल विषय वस्तु कैसे प्राप्त करें ?

DIKSHA App को लॉच करे –> App की समस्त अनुमति को स्वीकार करें –> उपयोगकर्ता Profile का चयन करें।

पाठ्यपुस्तक में QR Code को Scan करने के लिए मोबाइल में QR Code tap करें।

मोबाईल को QR Code पर केन्द्रित करें।

सफल Scan के पश्चात् QR Code से लिंक की गई सूची उपलब्ध होगी।

डेस्कटॉप पर QR Code का उपयोग कर डिजिटल विषय–वस्तु तक कैसे पहुँचे ?

1 QR Code के नीचे 6 अंक का Alpha Numeric Code दिया गया है।



2 ब्राउज़र में diksha. gov.in/cg टाईप करें।

3 सर्च बार पर 6 डिजिट का QR CODE टाईप करें।

4 प्राप्त विषय–वस्तु की सूची से चाही गई विषय–वस्तु पर क्लिक करें।

राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद् छत्तीसगढ़, रायपुर

निःशुल्क वितरण हेतु

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रकाशन वर्ष – 2019

राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद् छत्तीसगढ़, रायपुर

सहयोग

PRR9MI

(1) डॉ. रमाकान्त अग्निहोत्री, प्राध्यापक
भाषा विज्ञान विभाग, दिल्ली विश्वविद्यालय, दिल्ली

(2) डॉ. मनीषा पाठक, सेवा निवृत्त प्राचार्या

(3) डॉ. तोय निधि वैष्णव, प्राध्यापक, शा.दू.श्री वै.स्नातकोत्तर, संस्कृत महाविद्यालय, रायपुर

संयोजक

डॉ. विद्यावती चन्द्राकर

समन्वयक एवं सम्पादक

श्री बी. पी. तिवारी, सहायक प्राध्यापक, एस. सी. ई. आर. टी., रायपुर

लेखक-समूह

श्री बी.पी. तिवारी, डॉ. मनीषा पाठक, डॉ. तोयनिधि वैष्णव, डॉ. कुमुद कान्हे, श्री आर. पी. वाजपेयी, श्री शंकर लाल ध्रुव, श्रीमती प्रभावरी झा, श्रीमती मीना पाण्डेय, डॉ. एस. आर. शर्मा, श्रीमती उषापवार सिंह

चित्राङ्कन

राजेन्द्र सिंह ठाकुर, समीर श्रीवास्तव

पृष्ठ सज्जा

रेखराज चौरागड़े

आवरण पृष्ठ

हेमंत अभयंकर

सहयोग

आसिफ, भिलाई, **सुरेश साहू, मुकुन्द साहू**

फोटोग्राफ्स

संस्कृति विभाग के सौजन्य से, रायपुर

प्रकाशक

छत्तीसगढ़ पाठ्यपुस्तक निगम, रायपुर (छ.ग.)

मुद्रक

मुद्रित पुस्तकों की संख्या – .....

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्राक्कथन

शिक्षण में पाठ्यपुस्तकों की उपादेयता महत्वपूर्ण सहायक उपकरण के रूप में होती है । इसके माध्यम से छात्रों के व्यवहार में वाञ्छित परिवर्तन लाने हेतु प्रयास किया जाता है, जिससे उन्हें नये ज्ञान एवं अनुभवों की सम्प्राप्ति सुगमतापूर्वक हो जाती है । संस्कृत विषय की नवीन पाठ्यपुस्तकों का सर्जन छत्तीसगढ़ राज्य की आवश्यकताओं एवं अपेक्षाओं के अनुरूप किया गया है ।

हमारी शिक्षा में संस्कृत का विशेष महत्व है । भारतीय संस्कृति के संरक्षण तथा हिन्दी भाषा और साहित्य के सम्यक् ज्ञान के लिए सम्प्रति संस्कृत का ज्ञान परमावश्यक है । कक्षा छठवीं में पठन-पाठन की व्यवस्था को ध्यान में रखते हुए यह पाठ्यपुस्तक नवीन पाठ्यक्रम पर आधारित है । राष्ट्रीय शिक्षा नीति 1986 के अनुरूप विद्यालयों के प्रत्येक स्तर पर न्यूनतम अधिगम स्तर की प्राप्ति पर बल दिया गया है । पाठ्य सामग्री का चयन छात्रों की मानसिक दक्षता व रुचि को ध्यान में रखकर किया गया है । संस्कृत शिक्षण को अधिक सरल, सुबोध एवं व्यवहारपरक बनाने की दृष्टि से पाठ्यसामग्री का चयन सामान्य जन-जीवन में क्रियाकलापों के आधार पर किया गया है । इस पाठ्यपुस्तक में निम्नलिखित बिन्दुओं पर विशेष बल दिया गया है-

1. पाठों की सरल भाषा व प्रस्तुतीकरण की रोचक विधि ।
2. भाषायी कौशलों का विकास ।
3. संवाद वाक्य एवं उसकी शब्दावली अगली कक्षाओं में छात्रों की समझ को पुष्ट बनाएगी ।
4. पाठ्यपुस्तक छात्रों में अपने राष्ट्र एवं संस्कृति के प्रति समादर एवं भावनात्मक एकता उत्पन्न करनेपर पुनःबल देगी ।
5. आधुनिक वैज्ञानिक आविष्कार, कम्प्यूटर (संगणक), फ्रिज (शीतलक यंत्र), रेडियो, वायुयान, दूरदर्शन एवं चलित दूरभाष (मोबाइल) एवं पर्यावरण गीतम् पाठ, छत्तीसगढ़ के पर्व, पौराणिक कथा, पञ्चतन्त्र कथा, प्रहेलिका, आहारः (स्वास्थ्य), वर्षागीतम्, वसन्त वर्णनम्, राष्ट्रीय पर्व, महापुरुषों की जीवनी, नीतिश्लोकाः, सूक्तयः आदि का समावेश इसमें प्रासङ्गिकता व नवीनता लाएगी।
6. प्रत्येक पाठ के अन्त में अभ्यास के प्रश्न दिए गए हैं । इस बात का ध्यान रखा गया है कि भावबोध एवं क्रियात्मक अभ्यास के प्रश्नों द्वारा पाठ में निहित मर्म (अवधारणाएँ), भाषा-शैली एवं शिक्षण-विधियों के विविध पक्ष ग्राह्य एवं अभिव्यक्ति क्षमता दे सकें । फलस्वरूप वे अपनी वर्तनी, उच्चारण, शब्द एवं वाक्य-रचना सम्बन्धी दक्षताओं एवं प्रवीणताओं में निखार ला सकें ।
7. पाठ्यपुस्तक में छात्र-क्रिया कलाप (गतिविधियों) पर विशेष बल दिया गया है।
8. पाठ्यसामग्री को रोचक बनाने हेतु आवश्यक चित्रों का भी यथास्थान समावेश किया गया है ।

बच्चों के मन में संस्कृत भाषा के प्रति रुचि तथा सृजनात्मक अभिव्यक्ति क्षमता विकसित करने में शिक्षण विधा की महती भूमिका होती है । अतः कक्षा-शिक्षण के समय पाठ्यसामग्री का रचनात्मक उपयोग परमावश्यक है । पाठ्यपुस्तक विकास की सहभागिता आधारित प्रक्रिया के अंतर्गत विषय विशेषज्ञों के गहन विचार-विमर्श के उपरान्त पाठ्यपुस्तक का विकास किया गया है । संस्कृत पाठ्यपुस्तक के उन सभी विशेषज्ञों के प्रति आभार व्यक्त करता हूँ जिनके ज्ञान,अनुभव और सतत् परिश्रम से इस पुस्तक को आकार मिला है ।

स्कूल शिक्षा विभाग एवं राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, छ.ग. द्वारा शिक्षकों एवं विद्यार्थियों में दक्षता संवर्धन हेतु अतिरिक्त पाठ्य संसाधन उपलब्ध कराने की दृष्टि से Energized Text Books एक अभिनव प्रयास है, जिसे ऑन लाईन एवं ऑफ लाईन (डाउनलोड करने के उपरांत) उपयोग किया जा सकता है। ETBs का प्रमुख उद्देश्य पाठ्यवस्तु के अतिरिक्त ऑडियो–वीडियो, एनीमेशन फॉरमेट में अधिगम सामग्री, संबंधित अभ्यास, प्रश्न एवं शिक्षकों के लिए संदर्भ सामग्री प्रदान करना है।

संचालक

राज्य शैक्षिक अनुसंधान और प्रशिक्षण परिषद्

छत्तीसगढ़, रायपुर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठ्यक्रम

पाठ्यविषय- संस्कृत विषय को रुचिकर बनाने के लिये गद्य, पद्य कथा, नाटक तथा संवाद पाठों का उचित मात्रा में समायोजन किया गया है.

2. पाठ्य पुस्तक में अन्तर्निहित पाठ्य विषय छात्रों में राष्ट्र एवं संस्कृति के प्रति भावनात्मक एकता को बढायेंगे.

3. कक्षा 6 संस्कृत में पठन-पाठन की व्यवस्था को दृष्टिगत रखते हुए वैज्ञानिक आविष्कार सङ्गणक, फ्रीज,रेडियो, वायुयान, चलितदूरभाष (मोबाइल), पर्यावरण गीत छत्तीसगढ के पर्व, वर्षागीतम्, बसन्तवर्णनम्, राष्ट्रीय पर्व, महापुरुषों की जीवनी,नीतिश्लोक, सूक्ति, आदि पाठों को समावेशित किया गया है.

कौशलपरक दक्षताएँ-

1. **श्रवण-** छात्र संस्कृत की विशिष्ट ध्वनियों को सुनकर पहचान सकेगा. जिसमें अकारान्तपद विसर्ग, अनुनासिक एवं अनुस्वार की ध्वनियाँ,संयुक्ताक्षर ऊष्म ध्वनियाँ आदि.

   2. संस्कृत के सरल वाक्यों को सुनकर अर्थ समझ सकेगा.

2. **भाषण-** संस्कृत ध्वनियों से बने पदों का शुद्ध उच्चारण कर सकेगा.

   2. पाठ्यपुस्तक में आए सुभाषितों को कण्ठस्थ कर सुना सकेगा.

   3. संस्कृत में छोटे-छोटे सरल प्रश्नों का उत्तर दे सकेगा.

3. **वाचन-** 1. सरल संस्कृत गद्यांश का शुद्ध वाचन कर सकेगा.

   2. सुभाषितों को कण्ठस्थ कर सुना सकेगा.

4. **लेखन-** सरल शब्दों का शुद्ध वर्तनी में लेखन कर सकेगा.

   2. सरल संस्कृत वाक्यों को सुनकर शुद्ध रूप से लिख सकेगा.

5. **चिन्तन-** पाठ्यपुस्तक को पढ़कर अथवा सुनकर उसमें विद्यमान गुण-दोषों के विषय में मत रख सकेगा.

6. **भाषिक तत्व-** 1. वाक्य में विशेष्य के साथ सही विशेषण का अन्वय कर सकेगा.

   2. वाक्य में प्रयुक्त नाम पर (संज्ञा, सर्वनाम) के साथ क्रिया पदों का अन्वय कर सकेगा.

   3. संस्कृत में सरल प्रश्न पूछ सकेगा तथा उनमें उत्तर भी दे सकेगा.

7. **अभिरुचि**- बालगीतों, कहानी एवं संवाद के माध्यम से संस्कृत के प्रति अभिरुचि उत्पन्न करना .

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

संस्कृत व्याकरण-

संज्ञा- अकारान्त पुल्लिङ्ग- बालक, नर, देव, वृक्ष आदि.

अकारान्त नपुंसकलिङ्ग - पुस्तक, पुष्प, वन,जल, फल, नयन, मुख, ग्रह, वस्त्र, भोजन, शयन, शरण, नगर स्थान आदि.

अकारान्त स्त्रीलिङ्ग- बालिका,शाला,रमा, कन्या, बाला, जनता, तृष्णा परीक्षा, लता, यात्रा,वर्षा, विद्या, सेवा, कथा, सभा आदि।

इकारान्त पुल्लिङ्ग- मुनि, हरि, कवि, कपि, रवि, आदि।

उकारान्त पुल्लिङ्ग-धेनु, तनु, चञ्चु, रज्जु आदि।

ईकारान्त स्त्रीलिङ्ग - नदी, वाणी, भारती, भागीरथी, भगिनी, सरस्वती, जननी, पृथ्वी आदि।

सर्वनाम - अस्मद्, युष्मद्, तद्, किम्

विशेषण - (संख्यावाची) एक से पाँच तक

संख्यावाचक एक, द्वि, त्रि, चतुर् एवं पञ्चन् शब्द के रूप तीनों लिङ्गों में चलते हैं।

उपसर्ग - प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुर्, पुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप।

कारक- कारक चिन्हों का ज्ञान एवं विभक्ति में प्रयोग कर्ताकारक, कर्मकारक, करण कारक सम्प्रदान कारक, अपादान कारक, सम्बन्ध कारक, अधिकरण कारक, सम्बोधन कारक।

क्रिया- क्रिया का ज्ञान कर लकारों में प्रयोग।

धातु - भू (भव्) लिख् ,हस्, पा (पिब्) नी (नय्)।

लकार - लट्, लङ् एवं लृट् लकार का प्रयोग।

वचन - एक वचन, द्विवचन, बहुवचन।

लिङ्ग - पुल्लिङ्ग, स्त्रीलिङ्ग, नपुंसकलिंङ्ग।

पुरुष - प्रथम पुरुष, मध्यम पुरुष, उत्तम पुरुष।

अव्यय - अधुना, श्वः, अधः, पश्चात्, उपरि, ततः, यतः, कुतः, सर्वतः, पुरतः, पुरः, यदा, कदा, तदा, कथम्, अतः, कुत्र आदि ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अनुक्रमणिका

क्र.	पाठ का नाम		पृष्ठ क्रमांक
	स्तुतिः		1
1.	संवादः	संवादः पाठः	2
2.	गावोविश्वस्य मातरः	गद्यम्	11
3.	राष्ट्रध्वजः	गद्यम् (राष्ट्रीय पाठः) संवादः	13
4.	मम परिवारः	गद्यम् (पारिवारिक पाठः)	15
5.	प्रश्नोत्तरम्	गद्यम् (संवादः पाठः)	17
6.	छत्तीसगढप्रदेशः	गद्यम् (छत्तीसगढ़ परिचय पाठः)	19
7.	बालकः ध्रुवः	पौराणिक कथा (गद्यपाठः)	21
8.	आधुनिकयुगस्य आविष्काराः	गद्यम्	24
9.	मेलापकः	(गद्यपाठः)	28
10.	बालगीतम्	बालगीतम् (पद्यम्)	30
11.	शृंङ्गिऋषेः नगरी	गद्यम् (श्रृंगीऋषिस्थलपाठः)	32
12.	अस्माकम् आहारः	गद्यम् (स्वास्थ्यपाठः)	33
13.	शोभनम् उपवनम्	गद्यम् (स्वास्थ्यपाठः)	37
14.	जवाहरलालनेहरुः	गद्यम् (महापुरुषपाठः)	40
15.	वर्षागीतम् (बालगीतम्)	पद्यम् (ऋतुपाठः)	42
16.	दीपावलिः	गद्यम्	45
17.	छत्तीसगढराज्यस्य धार्मिकस्थलानि	गद्यम्	48
18.	नीतिनवनीतम्	पद्यम् (श्लोकपाठः)	50
19.	सूक्तयः खण्ड (अ)	सूक्तयः	52
	जयतु छत्तीसगढप्रदेशः खण्ड (ब)	गीतम्	54
	परिशिष्ट-व्याकरणम्	''व्याकरणम्''	56

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्तुतिः

शुक्लां ब्रह्म-विचार-सार-परमामाद्यां जगद्व्यापिनीम्,
वीणापुस्तक- धारिणीमभयदां, जाड्यान्धकारापहाम् ।
हस्तेस्फाटिकमालिकां विदधतीं, पद्मासने संस्थिताम्,
वन्दे तां परमेश्वरीं भगवतीं, बुद्धिप्रदां शारदाम् ॥

अर्थ-

श्वेत वर्ण वाली, ब्रह्म विचार-सार रूपी परम तत्व से युक्त, आदिरूपा, संसार में व्याप्त रहने वाली, वीणा और पुस्तक धारण करने वाली, अभय प्रदान करने वाली, जड़ता (अज्ञानता) रूपी अंधकार को दूर करने वाली, हाथों में शुभ्र मणियों की माला धारण करने वाली, कमल रूपी आसन में विराजमान रहने वाली एवं बुद्धि प्रदान करने वाली उस परमेश्वरी भगवती देवी को (मैं) प्रणाम करता हूँ ।

शब्दार्थाः-

शुक्लाम्	=	श्वेतवर्ण	पद्मासने	=	कमल रूपी आसन में
सारपरमाद्याम्	=	(सार-परमाम् + आद्यां) सार रूपी परम तत्व से समन्वित	बुद्धिप्रदाम्	=	बुद्धि प्रदान करने वाली
			शारदाम्	=	सरस्वती देवी को
जगद्व्यापिनीम्	=	संसार में व्याप्त रहने वाली	जाड्यान्धकारापहाम्	=	जड़ता रूपी अन्धकार को दूर करने वाली
हस्तेस्फाटिक	=	हाथों में स्फटिक			
मालिकाम्	=	माला	संस्थिताम्	=	विराजमान रहने वाली

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

1. संवादः

1.1 हट्टवार्ताः (गीता गच्छति हट्टम्)

मोहनः - गीते ! त्वं कुत्र गच्छसि ?

गीता - मोहन ! अहं हट्टं प्रति गच्छामि ।

मोहनः - गीते ! किमर्थम् ?

गीता - मोहन ! शाकं फलं च क्रेतुम् । अधुना त्वं कुत्र गच्छसि ।

मोहनः - गीते ! अधुना अहं गृहं प्रति गच्छामि ।

शब्दार्थाः-

त्वम्	=	तुम
कुत्र	=	कहाँ
गच्छसि	=	जा रहे हो
हट्टं प्रति	=	बाजार की ओर
किमर्थम्	=	किसलिए
शाकम्	=	शाक
क्रेतुम्	=	खरीदने के लिए
अधुना	=	अब
गच्छामि	=	जाता हूँ

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

1.2 छात्रालापः

वासुदेवः - भोः मित्र ! त्वं कस्यां कक्षायां पठसि ?

सुरेशः - मित्र ! अहं षष्ठ्यां कक्षायां पठामि ।
त्वं कस्यां कक्षायां पठसि ?

वासुदेवः - अहं सप्तम्यां कक्षायां पठामि ।

सुरेशः - तव कक्षायाः आचार्यस्य किं नाम अस्ति ।

वासुदेवः - मम कक्षायाः आचार्यस्य नाम ज्ञानानन्दः अस्ति ।
तव कक्षायाः आचार्यस्य नाम?

सुरेशः - मम कक्षायाः आचार्यस्य नाम परमानन्दः अस्ति ।

वासुदेवः - तव कक्षायां कति छात्राः पठन्ति ?

सुरेशः - मम कक्षायां चत्वारिंशत् छात्राः पठन्ति ।
तव कक्षायाम् च ?

वासुदेवः - मम कक्षायां पञ्चाशत् छात्राः पठन्ति ।

शब्दार्थाः -

कस्यां कक्षायाम् = किस कक्षा में, पठामि = पढ़ता हूँ, पठसि = पढ़ते हो, सप्तम्यां कक्षायाम् = सातवीं कक्षा में, कक्षायाः आचार्यस्य = कक्षा आचार्य का, कति = कितना, पठन्ति = पढ़ते हैं, चत्वारिंशत् = चालीस, पञ्चाशत् = पचास, पठन्ति = पढ़ते हैं ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

1.3 परिजनसंवादः

शीला - सखि ! तव किं नाम अस्ति ?

विमला - मम नाम विमला अस्ति ।
सखि ! तव किं नाम अस्ति ?

सुशीला - मम नाम सुशीला अस्ति ।

विमला - त्वं कुत्र वससि ?

सुशीला - अहं रायपुर आख्ये नगरे वसामि । त्वं च ?

विमला - अहं बिलासपुर आख्ये नगरे वसामि ।

सुशीला - तव पितुः किं नाम अस्ति ?

विमला - मम पितुः नाम श्री सुशीलकुमारः अस्ति ।
तव पितुः नाम ?

सुशीला - मम पितुः नाम चन्द्रकुमारः अस्ति ।

विमला - तव पिता किं कार्यं करोति ?

सुशीला - मम पिता कृषिकार्यं करोति । तव पिता ?

विमला - मम पिता अध्यापकः अस्ति ।

सुशीला - मम एका अग्रजा अस्ति । तव ?

विमला - मम द्वौ अनुजौ स्तः । अग्रजा न अस्ति ।

सुशीला - तव माता कीदृशी अस्ति ?

विमला - मम माता अति सरला अस्ति । तव माता ?

सुशीला - मम मातुः स्वभावः सरलः मधुरः च अस्ति ।

शब्दार्थाः

वससि = रहते हो, आख्ये = नामक, वसामि = रहता हूँ, तव पितुः = तुम्हारे पिता का, मम पितुः = मेरे पिता का, करोति = करते है, अग्रजा = बड़ी बहन, द्वौ अनुजौ स्तः = दो भाई हैं, कीदृशी = कैसी, मम माता = मेरी माता, तव माता = तुम्हारी माता

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

1.4 मनोहरम् उद्यानम्

गोपालः - कृष्ण ! त्वं प्रातः काले कुत्र गच्छसि ?

कृष्णः - गोपाल ! अहं प्रातः काले उद्यानं प्रति गच्छामि ।

गोपालः - कृष्ण ! उद्याने कति वृक्षाः सन्ति ?

कृष्णः - गोपाल ! उद्याने अनेके वृक्षाः सन्ति ।

गोपालः - कृष्ण ! केषाञ्चित् वृक्षाणां नामानि वद ।

कृष्णः - गोपाल ! अशोकवृक्षाः, वटवृक्षाः, निम्बवृक्षाः इत्यादयः बहवः वृक्षाः सन्ति।

गोपालः - कृष्ण ! त्वम् उपवने कथम् अनुभवसि ?

कृष्णः - गोपाल ! अहम् उपवने मनोहरम् अनुभवामि ।

शब्दार्थाः

त्वम् = तुम	कुत्र = कहाँ
उद्यानं प्रति = उद्यान की ओर	बहवः = बहुत
केषाञ्चित् वृक्षाणाम् = कुछ वृक्षों के	नामानि = नामों को
कथम् = कैसे	अनुभवसि = अनुभव करते हो
मनोहरम् = सुन्दर	अनुभवामि = अनुभव करता हूँ ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

1.5 बुभुक्षिता लोमशा

पल्लवी - पूजे ! अहम् अद्य एकां लोमशाम् अपश्यम् ।

पूजा - पल्लवि ! त्वं तां लोमशां कुत्र अपश्यः ?

पल्लवी - पूजे ! अहं वने अपश्यम् ।

पूजा - पल्लवि ! सा लोमशा अति बुभुक्षिता आसीत् ।

पल्लवी - पूजे ! सा लोमशांक्षुधाशान्त्यर्थं वृक्षस्य उपरि भागे द्राक्षायाः फलानि दृष्ट्वा उत्पतति।

पूजा - पल्लवि ! परन्तु द्राक्षायाः फलानि अति उपरि आसन् ।

पल्लवी - पूजे ! सा लोमशा पुनः पुनः उत्पतति । परं द्राक्षायाः फलानि न प्राप्नोत् ।

पूजा - पल्लवि ! सा लोमशा कथयति- अहं द्राक्षायाः फलानि न खादामि । द्राक्षायाः फलानि अम्लानि सन्ति ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दार्थाः

एकां लोमशाम् = एक लोमड़ी को	अपश्यम् = देखा
बुभुक्षिता = भूखी	द्राक्षायाः फलानि = अंगूर के फल
उपरि = ऊपर में	आसन् = थे
उत्पतति = उछलती है	कथयति = कहती है
अम्लानि = खट्टे	सन्ति = हैं।

अभ्यासः

1. निम्नलिखित संवादों को पढ़िए-

मोहनः - गीते ! त्वं कुत्र गच्छसि ?

गीता - मोहन ! अहं हट्टं प्रति गच्छामि ।

मोहनः - गीते ! किमर्थम् ?

गीता - मोहन ! शाकं फलं च क्रेतुम् । अधुना त्वं कुत्र गच्छसि ?

मोहनः - गीते ! अधुना अहं गृहं प्रति गच्छामि ।

2. रिक्त स्थानों की पूर्ति कीजिए -

मोहनः - गीते ! त्वं कुत्र गच्छसि ।

गीता - मोहन ! .....

मोहनः - गीते ! किमर्थम् ।

गीता - मोहन ! .....

मोहनः - गीते ! अधुना अहं गृहं प्रति गच्छामि ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ख) निम्नलिखित संवादों को पढ़िए-

गोपालः - कृष्ण ! त्वं प्रातः काले कुत्र गच्छसि ?

कृष्णः - गोपाल ! अहं प्रातः काले उद्यानं प्रति गच्छामि।

गोपालः - कृष्ण ! उद्याने कति वृक्षाः सन्ति ।

कृष्णः - गोपाल ! उद्याने अनेकाः वृक्षाः सन्ति ।

गोपालः - कृष्ण ! केषाञ्चित् वृक्षाणां नामानि वद ।

कृष्णः - गोपाल ! अशोकवृक्षाः, वटवृक्षाः, निम्बवृक्षाः इत्यादयः बहवः वृक्षाः सन्ति ।

गोपालः - कृष्ण ! त्वम् उपवने कथम् अनुभवसि ?

कृष्णः - गोपाल ! अहम् उपवने मनोहरम् अनुभवामि ।

रिक्त स्थानों की पूर्ति कीजिए-

गोपालः - कृष्ण ! त्वं प्रातः काले कुत्र गच्छसि ?

कृष्णः - गोपाल ! .....

गोपालः - कृष्ण ! उद्याने कति वृक्षाः सन्ति ?

कृष्णः - गोपाल ! .....

गोपालः - कृष्ण ! केषाञ्चित् वृक्षाणां नामानि वद ।

कृष्णः - गोपाल ! .....

गोपालः - कृष्ण ! त्वम् उपवने कथम् अनुभवसि ।

कृष्णः - गोपाल ! .....

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ग) निम्नलिखित संवादों को पढ़िए-

पल्लवी - पूजे ! अहम् अद्य एकां लोमशाम् अपश्यम् ।
पूजा - पल्लवि ! त्वं तां लोमशां कुत्र अपश्यः ।
पल्लवी - पूजे ! अहं वने अपश्यम् ।
पूजा - पल्लवि ! सा लोमशा अति बुभुक्षिता आसीत् ।
पल्लवी - पूजे ! सा लोमशा क्षुधाशान्त्यर्थं वृक्षस्य उपरि भागे द्राक्षायाः फलानि दृष्ट्वा उत्पतति ।
पूजा - पल्लवि ! परन्तु द्राक्षायाः फलानि अति उपरि आसन् ।
पल्लवी - पूजे ! सा लोमशा पुनश्च उत्पतति । परं द्राक्षायाः फलानि न प्राप्नोत् ।
पूजा - पल्लवि ! सा लोमशा कथयति- अहं द्राक्षायाः फलानि न खादामि । द्राक्षायाः फलानि अम्लानि सन्ति।

रिक्त स्थानों की पूर्ति कीजिए-

पल्लवी - पूजे ! अहम् अद्य एकां लोमशाम् अपश्यम् ।
पूजा - पल्लवि ! .....
पल्लवी - पूजे ! अहं वने अपश्यम् ।
पूजा - पल्लवि ! .....
पल्लवी - पूजे ! सा लोमशा क्षुधाशान्त्यर्थ वृक्षस्य उपरि भागे द्राक्षायाः फलानि दृष्ट्वा उत्पतति ।
पूजा - पल्लवि ! .....
पल्लवी - पूजे ! सा लोमशा पुनश्च उत्पतति । परं द्राक्षायाः फलानि न प्राप्नोत् ।
पूजा - पल्लवि ! .....

अभ्यासः "मोहन" अकारान्त पुल्लिंग

विभक्ति	एकवचन	द्विवचन	बहुवचन	कारकादि
प्रथमा	मोहनः	मोहनौ	मोहनाः	कर्त्ता
द्वितीया	मोहनम्	मोहनौ	मोहनान्	कर्म
तृतीया	मोहनेन	मोहनाभ्याम्	मोहनैः	करण
चतुर्थी	मोहनाय	मोहनाभ्याम्	मोहनेभ्यः	सम्प्रदान
पञ्चमी	मोहनात्	मोहनाभ्याम्	मोहनेभ्यः	अपादान
षष्ठी	मोहनस्य	मोहनयोः	मोहनानाम्	सम्बन्ध
सप्तमी	मोहने	मोहनयोः	मोहनेषु	अधिकरण
सम्बोधन	हे मोहन!	हे मोहनौ !	हे मोहनाः !	सम्बोधन

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हिन्दी रूप	-	संस्कृत रूप	-	कारक
राम ने	-	रामः	-	कर्त्ता
राम को, के द्वारा	-	रामम्	-	कर्म
राम से	-	रामेण	-	करण
राम के लिए	-	रामाय	-	सम्प्रदान
राम से	-	रामात्	-	अपादान
राम का	-	रामस्य	-	सम्बन्ध
राम में	-	रामे	-	अधिकरण
हे राम	-	हे राम	-	सम्बोधन

उपर्युक्त विभक्तियों को क्रमशः प्रथमा, द्वितीया, तृतीया आदि नामों से जाना जाता है । इससे कारक आदि का ज्ञान प्राप्त किया जाता है । संस्कृत में एकवचन, द्विवचन व बहुवचन का प्रयोग एक, दो, तीन एवं तीन से अधिक के लिए प्रयोग होते हैं ।

1. कारकों में सम्बन्ध और सम्बोधन कारक नहीं कहे जाते । चूंकि कारक के लिए क्रिया का सम्बन्ध कर्त्ता से होना चाहिए । अतः कहा गया है ''क्रिया जनकं कारकम्'' कारक क्रिया को उत्पन्न करता है ।
2. तृतीया करण कारक में णत्व विधान के अनुसार 'न' का 'ण' होता है जैसे रामेन न होकर रामेण होता है। इसी तरह षष्ठी बहुवचन में रामानाम् के स्थान पर रामाणाम् होता है । अन्य अकारान्त बालक का बालकेन, सोहन का सोहनेन होगा ।
3. ऊपर लिखे कारकों पर विचार किया जाय तो विविधता के बीच बहुत कुछ समानता है ।
   (अ) कर्त्ता और सम्बोधन में द्विवचन और बहुवचन के रूप
   (ब) कर्त्ता और कर्म में
   (स) करण, सम्प्रदान और अपादान में ।
   (द) सम्बन्ध और अधिकरण में द्विवचन के रूप

   निम्नांकित शब्दों के रूप ''मोहन'' के समान चलेंगें-

   राम, श्याम, बालक, देव, सोहन, गजानन, कृष्ण, छात्र,

   अश्व, मृग, शुक, गज आदि ।

PCJBLX

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PCR6PH

2. गावो विश्वस्य मातरः



गौः न केवलं भारतस्य अपितु विश्वस्य माता अस्ति । सर्वेषु पशुषु गौः एका अहिंसका बुद्धिमती स्नेहकारिणी पारिवारिका पशुः अस्ति । माता इव सा अस्माकं जीवनं रक्षितुं समर्था अस्ति । यथा माता दुखं सोड्ढ्वा अपि पुत्रं रक्षति, लालयति, पालयति च, तथैव गौः शस्यानि बुषं भुक्त्वा शीतातपं वर्षां च सोड्ढ्वा अस्मभ्यं दुग्धं ददाति । तस्याः दुग्धं सर्वेषां पशुनां दुग्धात् श्रेष्ठतरं, सुपाच्यं, स्फूर्तिदायकं, मेधावर्धकं च भवति । दुग्धात् परिवर्तितं दधि, तक्रं, घृतं च स्वास्थाय विशिष्टं लाभप्रदं भवति । तक्रेण घृतेन च प्राणरक्षकाः अनेकाः औषधयः निर्मिताः भवन्ति । गोः मूत्रं नेत्रयोः अपूर्वा औषधिः, अनेकासु औषधिषु अपि प्रयुक्तं भवति । गोमयेन वयं स्वगृहान् पवित्रीकुर्मः गोमयस्य स्पर्शेन अनेकान् मानसिकरक्तचापसम्बन्धि रोगान् शमयति। अनेन सिद्धयति यत् गौः अनेकेन प्रकारेण अस्माकं मातृवत् रक्षां करोति । गोवत्साः अस्माकं कृषिप्रधाने देशे कृषकानाम् अपूर्वाः सहायकाः सन्ति । ते कृषकैः सह न केवलं कृषिकार्यं कुर्वन्ति अपितु शकटम् अपि वहन्ति। गोमयं गोमूत्रं च श्रेष्ठतमं कृषि-पोषक तत्वं खाद इति संज्ञकम् अस्ति। यदि गोः सम्पूर्णभावेन रक्षा स्यात् तदा निश्चयमेव समस्तं विश्वं दुग्धेन, घृतेन, अन्नेन च जनान् पालयितुं समर्थो भविष्यति । अतः इयम् उक्तिः सत्या यत् ''गावो विश्वस्य मातरः'' इति ।

शब्दार्थाः -

सोड्ढ्वा	=	सहकर
शस्यानि	=	घास
बुषम्	=	भूसा
गोमयम्	=	गोबर
तक्रम्	=	मट्ठा
कृषि	=	खेती
शकटम्	=	बैलगाड़ी

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वहन्ति	=	ढोते हैं
रक्षितुम्	=	रक्षा करने के लिए
अपितु	=	और भी

अभ्यासः

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत भाषा में लिखिए -

क. गौः कीदृशः पशुः अस्ति ?

ख. गोः दुग्धं कियत् लाभकारकं भवति ?

ग. गोमयस्य उपयोगः केषु केषु कार्येषु भवति ?

घ. कथम् गौः विश्वस्य माता अस्ति ?

ङ. गोवत्सानां प्रयोगः केषु कार्येषु वयं कुर्मः ?

2. सह = साथ के योग में तृतीय विभक्ति का प्रयोग होता है अर्थात् जिसके साथ ''सह'' का प्रयोग हो उस शब्द में तृतीया के एक वचन, द्वि वचन, बहु वचन का प्रयोग करना चाहिए। जैसे कृषकैः 'सह' में कृषक शब्द में तृतीया का बहुवचन हो जाता है। इसी आधार पर निम्न वाक्यों का संस्कृत अनुवाद कीजिए -

क. राम के साथ लक्ष्मण भी वन को जाते हैं।

ख. कृष्ण के साथ गोप खेलते हैं।

ग. किसानों के साथ बैल (वृषभ) भी काम करते हैं।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PD12R5

3. 'राष्ट्रध्वजः'

प्रमोदः - मित्र सुबोध ! चित्रे किं दृश्यते ?

सुबोधः - मित्र प्रमोद ! चित्रे एको ध्वजो दृश्यते ।

प्रमोदः - मित्र ! अयं कस्य देशस्य ध्वजः अस्ति ?

सुबोधः - मित्र ! अयम् अस्माकं राष्ट्रस्य भारतस्य ध्वजः अस्ति । अतः राष्ट्रध्वजः कथ्यते।

प्रमोदः - मित्र सुबोध ! ज्ञातं मया । किमयमेव राष्ट्रध्वजः अस्माकं देशे 'तिरंगा' इति नाम्ना प्रसिद्धिं प्राप्तः ?

सुबोधः - अथ किं मित्र प्रमोद ! अस्मिन् ध्वजे त्रयोरंगाः वर्णाः वा सन्ति । अतः 'तिरंगा' कथ्यते ।

प्रमोदः - मित्र ! अत्र त्रिपट्टिकाः दृश्यते ! तासु त्रीन् वर्णान् पश्यामि । उपरितनः पिण्याकवर्णः (केसरवर्णः) दृश्यते। अयं कस्य भावस्य प्रतीकः वर्तते ।

सुबोधः - मित्र ! पिण्याकवर्णः (केसरवर्णः) त्यागस्य, जागरणस्य, शौर्यस्य च प्रतीको अस्ति ।

प्रमोदः - मित्र ! श्वेतपट्टिकायाः वर्णः कं भावं द्योतयति ।

सुबोधः - मध्यस्थितायाः श्वेतपट्टिकायाः वर्णः सत्यं निर्मलतां च द्योतयति ।

प्रमोदः - मित्र ! अधः स्थितायाः हरितपट्टिकायाः वर्णः कं भावं प्रदर्शयति ?

सुबोधः - मित्र ! अधो भागे विद्यमानायाः हरितपट्टिकायाः वर्णः जीवनसमृद्धिं सुखं च प्रदर्शयति ।

प्रमोदः - मित्र ! अहं श्वेतपट्टिकायाम् एकं चक्रमपि पश्यामि । किञ्च द्योतयति?

सुबोधः - मित्र ! इदम् अशोकचक्रमस्ति एतत् चक्रं गतिशीलतां द्योतयति । राष्ट्रीयपर्वसु राष्ट्रध्वजारोहणं क्रियते । अस्माकं प्रधानमंत्री प्रत्येकमगस्त मासस्य पञ्चदशतारिकायां देहल्याः रक्तदुर्गात् राष्ट्रध्वजोत्तोलनं करोति ।

प्रमोदः - मित्र सुबोध ! अवगतं राष्ट्रध्वजस्य महत्वम् । अयं राष्ट्रध्वजोऽस्माकं सर्वेषां भारतीयानाम् आदरभाजनम् । अयं सर्वेषां भारतीयानां वन्दनीयः ।

सुबोध प्रमोदः च राष्ट्रध्वजं श्रद्धया नमतः स्वगृहम् च गच्छतः ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दार्थाः

PD33Q8

द्योतयति	-	सूचित करता है ।
पर्वसु	-	उत्सवों में ।
राष्ट्रध्वजारोहणम्	-	राष्ट्रध्वज का फहराना ।
रक्तदुर्गात्	-	लाल किले से ।
उत्तोलनम्	-	फहराना ।

अभ्यासः

1. संस्कृत में उत्तर दीजिए ।

क. चित्रे किं दृश्यते?

ख. ध्वजे कतिवर्णाः सन्ति ?

ग. श्वेतपट्टिकायाः वर्णः कं भावं द्योतयति ?

घ. अशोकचक्रं किं द्योतयति ?

2. रिक्त स्थानों की पूर्ति कीजिए ।

क. राष्ट्रध्वजः ..... इति नाम्ना प्रसिद्धम् ।

ख. राष्ट्रध्वजस्य उपरितनः ..... वर्णः दृश्यते ।

3. संस्कृत में अनुवाद कीजिए ।

क. मैं श्वेत पट्टिका में एक चक्र भी देखता हूँ ।

ख. राष्ट्रध्वज राष्ट्र की एकता का प्रतीक है ।

ग. दोनों राष्ट्रध्वज को प्रणाम करते हैं ।

4. विभक्ति-निर्देश कीजिए ।

अस्माकम्, राष्ट्रस्य, रक्तदुर्गात्, सर्वे ।

5. सन्धि विच्छेद कीजिए ।

अथवेयं, ध्वजोत्तोलनम्, ध्वजोऽस्माकम् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PDBYRV

4. मम परिवारः



एकस्मिन् ग्रामे जगत्पालो नाम एकः सज्जनो वसतिस्म। तस्य परिवारः सीमित-परिवारः अस्ति । तस्य पत्नी कला अस्ति । जगत्पालः सप्तत्रिंशद्वर्षीयः कला द्वात्रिंशद्वर्षीया च स्तः । जगत्पालस्य हृदयमतीवोदारं, कलायाः स्वभावश्चातीव मधुरो विद्यते । तौ दम्पती निवसतः।

तयोः द्वे सन्तती स्तः । एकस्तनयः एका तनया च। तनयस्य नाम सुरेशः तनयाश्च नाम प्रतिभा अस्ति । सुरेशः एकादशवर्षीयः प्रतिभा सप्तवर्षीया च । सुरेशः सप्तम्-कक्षायां पठति प्रतिभा तृतीय-कक्षायां च ।

आम्रनिम्बकादिवृक्षैः आच्छादितं जगतपालस्य गृहमत्यन्तं रमणीयं वर्तते । जगत्पालः एकः योग्यः कुशल-कृषकः । सः सर्वदा कृषि कर्मणि व्यापृतः स्वकर्त्तव्यं पालयति । सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तमन्नं शाकं फलं च उत्पादयति । तस्य गृहे एका श्वेत-वर्णा धेनुः वर्तते । सा दुग्धं ददाति ।

सुरेशः प्रतिभा च स्वास्थ्यप्रदं पुष्टिप्रदं च भोजनं कुरुतः । तयोः आहारे शाकस्य फलस्य चाधिक्यं वर्तते । तौ भ्रातृभगिन्यौ यथेच्छं दुग्धं पिवतः । स्वच्छानि वस्त्राणि परिधाय प्रसन्नौ स्वस्थौ तौ मातरं पितरं च प्रणम्य पठनाय स्व विद्यालयं प्रति गच्छतः ।

कला एका स्वस्था आदर्शभूता च गृहिणी अस्ति । पति जगत्पालोऽपि स्वपत्नीं कलां बहु मन्यते । अनेन कारणेन परस्परस्नेह-सौहार्द्रबध्दः अयं लघुपरिवारः एकः आदर्शपरिवारः । आहारस्य वस्त्रस्य गृहस्य च व्यवस्था लघुपरिवारे एव समुचितरूपेण भवति । लघुपरिवारेणैव समाजस्य राष्ट्रस्य च कल्याणं भवितुम् अर्हति ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दार्थाः

एकस्मिन् ग्रामे	-	एक गांव में ।	दम्पती	-	पति-पत्नी ।
वसति	-	रहता है ।	निम्ब	-	नीम का वृक्ष ।
जगत्पालस्य	-	जगतपाल का ।	तनयः	-	पुत्र
कक्षायाम्	-	कक्षा में ।	तनया	-	पुत्री ।
आच्छादितम्	-	ढका हुआ ।	शाकम्	-	सब्जी ।
कर्मणि	-	कर्म में ।	प्रणम्य	-	प्रणाम करके ।
व्यापृतः	-	लगा हुआ, तत्पर ।	अनेन-कारणेन	-	इस कारण से ।
तस्य गृहे	-	उसके घर में ।	अर्हति	-	योग्य है ।

अभ्यासः

1. निम्नांकित प्रश्नों के उत्तर संस्कृत भाषा में दीजिए ।

क. जगत्पालस्य हृदयं कीदृशम् अस्ति ?

ख. प्रतिभा कस्यां कक्षायां पठति ?

ग. कीदृशः परिवारः सुखीपरिवारः ?

घ. कला कीदृशी गृहिणी आसीत् ?

2. खाली स्थान पूर्ण कीजिए -

क. तयोः आहारे ..... चाधिक्यं वर्तते ।

ख. जगत्पालस्य गृहम् अत्यन्तम् ..... वर्तते ।

3. संस्कृत में अनुवाद कीजिए ।

क. जगत्पाल का हृदय उदार है ।

ख. उसकी पत्नी का नाम क्या है ?

ग. उसके पुत्र का नाम सुरेश है ।

घ. सुरेश किस कक्षा में पढ़ता है ?

ङ. यह छोटा परिवार है ।

4. निम्न का संधि विच्छेद कीजिए ।

क. तनयाश्च

ख. जगत्पालोऽपि

ग. एकस्तनयः

घ. परिवारेणैव

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

5. प्रश्नोत्तरम्

(गुरु-शिष्यसंवादः)

शिष्याः - नमस्ते गुरुदेव !

गुरुः - नमः शिष्येभ्यः ! मोहन, किं. त्वं पश्यसि ? अद्य अन्धकारः अस्ति ।

मोहनः - गुरुदेव ! किं कारणं अन्धकारस्य ?

गुरुः - सूर्यस्य न दर्शनं एव अन्धकारस्य कारणम् ।

गुरुः - सूर्यस्य नामानि- आदित्यः, रविः, भास्करः, दिनकरः, दिनपतिः, दिवाकरः, प्रभृतीनि सन्ति ।

छात्राः - सूर्यः किं करोति ?

गुरुः - सूर्यः प्रातः काले उदयते सायङ्काले च अस्तं गच्छति ।

छात्राः - सूर्य इति शब्दस्य कोऽर्थः ?

गुरुः - सूर्यः आकाशे सरति इति कारणात् सूर्यः । अत्र 'सृ' धातौ क्यप् प्रत्ययः । सूर्यस्य अन्याऽपि परिभाषा भवितुं अर्हति । सुवति अर्थात् लोकं कर्मणि प्रेरयति इति सूर्यः ।

छात्राः - सूर्यः किं किं करोति ?

गुरुः - प्रकाशं ददाति, अन्धकारं दूरीकरोति, रोगकीटाणुसमूहं नाशयति, सर्वंजीवं जीवयति, बुद्धिं वर्धयति, ज्ञानं ददाति, बलं वर्धयति, शक्तिं सञ्चारयति, अतः अस्य दैवीकरणं कृतम् । सूर्यस्य रश्मिषु सप्त रङ्गाः परिलक्ष्यन्ते ।

छात्राः - पुराणे सूर्यः रामस्य कुलदेवः अस्ति ?

गुरुः - सत्यं वदसि, रामः आज्ञाकारी अस्ति । सः आज्ञां पालयितुं वेदं पठति । मारीचं मारयति, रावणं हन्ति इति ।

छात्राः - गुरु देव ! रामस्य स्वरूपं वर्णय ।

गुरुः - मस्तके मुकुटं धारयति । सः ललाटे चन्दनं धारयति । स्कन्धे यज्ञोपवीतं, शरासनं च धारयति । पृष्ठे बाण-सहितं तूणीरं धारयति इति ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दार्थाः

पश्यसि	-	देखते हो ।	प्रेरयति	-	ले जाता है ।
सूर्यस्य	-	सूर्य का ।	जीवयति	-	जीवित रखता है ।
कति	-	कितने ।	वर्धयति	-	बढ़ाता है ।
उदयते	-	उगता है ।	सञ्चारयति	-	संचार करता है ।
सरति (चलति)	-	चलता है ।	कुलदेवः	-	कुल देवता ।
प्रभृतीनि	-	इत्यादि ।	वर्णय	-	वर्णन करो ।
प्रातःकाले	-	सुबह ।	धारयति	-	धारण करता है ।
भवितुम् अर्हति	-	होता है ।			

अभ्यासः

प्रश्न 1- निम्नांकित प्रश्नों के उत्तर दीजिए ?

अ. पाठ में आये क्रियापदों को लिखकर संस्कृत में स्वतंत्र वाक्य बनाइए ।

ब. पाठ के संज्ञा पदों को लिखकर विभक्ति के अनुसार वर्गीकरण कीजिए ।

स. सूर्य के पाँच पर्यायवाची शब्द लिखिए ।

द. सूर्य को अपनी मातृभाषा में क्या-क्या कहते हैं लिखिए ।

ई. क्रियापदों को अपनी मातृभाषा में लिखिए ।

फ. क्रियापदों से धातु एवं प्रत्यय अलग कीजिये ।

प्रश्न 2- रिक्त स्थान की पूर्ति कीजिए ।

अ. सूर्यः ------- ददाति ।

ब. सः वेदं ---------- ।

स. ---------- रावणं हन्ति ।

द. मस्तके ---------- धारयति ।

प्रश्न 3- संस्कृत में अनुवाद कीजिए ।

अ. गोपाल पुस्तक देता है ।

ब. सूर्य प्रकाश देता है ।

स. राम वेद पढ़ता है ।

द. सीता घर जाती है ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PEDHYG

6. छत्तीसगढप्रदेशः



भारतः अस्माकं देशः अस्ति। भारतवर्षस्य मध्यदक्षिणभागे छत्तीसगढप्रदेशः विराजते। छत्तीसगढप्रदेशस्य प्रमुखनदी महानदी अस्ति। सिहावा पर्वतात् उद्भूता महानदी छत्तीसगढप्रदेशस्य पवित्रतमा नदी अस्ति। यस्याः सहायक नदीषु शिवनाथ, हसदो, ईब, पैरी, जोंक, केलो, उदन्ती प्रभृतयः नद्यः अनवरतं छत्तीसगढप्रदेशस्य भूमिमुर्वरां विदधति । दक्षिणे गोदावरी नदी प्रवहति। यस्याः सहायिका इन्द्रावती नदी बस्तर मण्डलान्तर्गतं पश्चिम दिशायां प्रवहति। छत्तीसगढप्रदेशस्य राजधानी रायपुरनगरम् अस्ति।

छत्तीसगढप्रदेशः 2000 तमे ख्रीस्ताब्दे नवम्बर मासस्य प्रथम दिनाङ्के सुघटितः । प्रदेशस्य राजिमनगरं महत्वपूर्णं धार्मिकस्थलम् अभिधीयते। यत्र महानदी-पैरी-सोढूर प्रभृतीनां त्रिसृणां नदीनां संगम स्थली छत्तीसगढप्रदेशस्य 'गङ्गा' इति उच्यते। ऐतिहासिकस्थलं 'सिरपुरम्' सोमवंशीयराजानां राजधानी आसीत्। तत्र आनन्दपुरी बिहारभग्नः बौद्धविहारः चापि सन्ति। प्रदेशस्य कवर्धाक्षेत्रे भोरमदेवः छत्तीसगढप्रदेशस्य खजुराहो नाम्ना विख्यातः। छत्तीसगढप्रदेशस्य राजस्व-सम्भागः बिलासपुरमस्ति। बिलासपुर मण्डलान्तर्गतं रतनपुरम् इति ऐतिहासिकस्थलमस्ति । पुरा कलचुरिराजानां राजधानी आसीत्। तत्र महामाया मन्दिरं सुविख्यातम्। सरगुजा -जिलान्तर्गतं रामगढक्षेत्रस्य 'पहाड़ी' स्थानं महाकविकालिदासस्य मेघदूतकाव्यस्य रचनास्थली अभिधीयते। दन्तेवाड़ाजिलायां दन्तेवाड़ा दन्तेश्वरी देव्याः इति नाम्ना प्रसिद्धा।

अस्मिन् प्रदेशे प्रभूतमन्नमुत्पन्नं भवति। अतः छत्तीसगढप्रदेशः 'धान का कटोरा' इति उच्यते। छत्तीसगढप्रदेशः अरण्यानां प्रदेशोऽपि अस्ति। वनेभ्यः वयं काष्ठानि-फलानि औषधयः च प्राप्नुमः। वनेषु खगाः मृगाः व्याघ्राः च निवसन्ति। अस्मिन् प्रदेशे बारनवापारा सीतानदी अभ्यारण्य, मैत्रीउद्यानं च ख्यातिलब्धानि उद्यानानि सन्ति। प्रदेशस्य बस्तरक्षेत्रे आदिवासिजनानां बाहुल्यं लक्ष्यते। ते जनाः वनेषु निर्भयं भूत्वा विचरन्ति। साम्प्रतं शासनम् एषाम् उन्नत्यै बहुयतत। प्रदेशस्य देवभोगः मैनपुरं च रत्नानां खनिभूमिः। इस्पात नगरी भिलाई लौहादयः खनिजाः उद्योगानां कृते आधारभूताः। एवं राष्ट्र जीवने छत्तीसगढप्रदेशः प्रियतरः। जयतु जयतु छत्तीसगढप्रदेशः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दार्थाः

विराजते	-	विद्यमान है ।
उद्भूता	-	उत्पन्न हुई ।
विदधति	-	बढ़ाते हैं ।
अभिधीयते	-	कहते हैं ।
तिसृणां नदीनाम्	-	तीनों नदियों का ।
प्रभूतम्	-	बहुत ।
प्राप्नुमः	-	प्राप्त करते हैं ।
साम्प्रतम्	-	अब ।
खनिभूमिः	-	खनिज भूमि।
लक्ष्यन्ते	-	दिखाई देते है ।

PEME14

अभ्यासः

1. **निम्नांकित प्रश्नों के उत्तर संस्कृत भाषा में दीजिए ।**

क. छत्तीसगढप्रदेशः कुत्र विराजते ?

ख. अस्माकं प्रदेशस्य राजधानी का अस्ति ?

ग. छत्तीसगढप्रदेशस्य कस्मिन् भागे रत्नानि प्राप्नुवन्ति ?

घ. आदिवासिनः कुत्र विचरन्ति ?

2. **रिक्त स्थानों की पूर्ति कीजिए ।**

क. छत्तीसगढप्रदेशस्य प्रमुखा नदी .... अस्ति?

ख. छत्तीसगढप्रदेशस्य कवर्धाक्षेत्रे ....छत्तीसगढप्रदेशस्य खजुराहो नाम्ना विख्यातः ।

ग. बस्तर जिलायां दन्तेवाड़ा .... नाम्ना प्रसिद्धा ।

घ. छत्तीसगढप्रदेशः .... इति उच्यते ।

3. **सही जोड़ी बनाइए -**

1.	भिलाई नगरम्	-	सिहावा
2.	छत्तीसगढ	-	सरगुजा
3.	महानदी	-	इस्पात
4.	रामगढ	-	रायपुर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PEWA2R

7. बालकः ध्रुवः



पुरा उत्तानपादः नाम एकः राजा आसीत् । तस्य द्वे पत्न्यौ स्तः-एका सुनीतिः अपरा च सुरुचिः । राज्ञी सुरुचिः राज्ञोऽतीव प्रियासीत् । उत्तमः नाम तस्याः पुत्रः आसीत् । सुनीतिः राजानं नातिप्रियासीत् तस्याः पुत्रः ध्रुवः आसीत् ।

एकस्मिन् दिने राजा सुरुचेः पुत्रम् उत्तमम् अङ्के निधाय स्नेहं कुर्वन्नासीत् । तस्मिन् समये सुनीतेः पुत्रः ध्रुवः पितुः अङ्के स्थातुमैच्छत्। तद् दृष्ट्वा विमाता सुरूचिः अब्रवीत् । वत्स ! त्वं राजसिंहासने आरोढुम् अयोग्यः असि यतः त्वम् अन्यस्त्रीगर्भात् उत्पन्नोऽसि। यदि त्वं राजसिंहासने आरोढुम् इच्छसि तर्हि भगवतः नारायणस्य आराधनां कुरु । मम कुक्षौ च आगत्य जन्म गृहाण ।

विमातुः मुखात् एतानि कटु वचनानि श्रुत्वा बालकः ध्रुवः उच्चस्वरेण रोदनमारभत । किन्तु राजा उत्तानपादः इदं सर्वं तूष्णीं भूत्वा पश्यन्नासीत् । अत्रान्तरे बालकः ध्रुवः रोदनं कुर्वन् मातुः सुनीतेः पार्श्वं गतः अवदत् च विमातुः कटु-व्यवहार विषये । पुत्रात् सुरुचेः कटुवचनमाकर्ण्य सुनीतिः संयमेन ध्रुवमब्रवीत् - वत्स ! धैर्यं शान्तिं च धारय । यद्यपि त्वं विमातुः आचरणेन प्रताडितोऽसि तथापि त्वं परार्थे कदापि अमङ्गलं कामनां मा कुरु । यः पुरुषः अन्यान् खिन्नं करोति सः तस्य फलं अवश्यमेव प्राप्नोति। अतः भौ वत्स ! त्वं विमातुः कटुसत्यं पालयन् भगवतः नारायणस्य चरणकमलयोः आराधनां कुरु । तपसा तव पूर्वजाः परां शान्तिम् अलभन्त ।

मातुरादेशेन ध्रुवः ईश-ध्यानं प्रति प्रेरणां गृहीत्वा स राजप्रासादं त्यक्त्वा च वनम् अगच्छत् । वने ध्रुवः घोरतपः अकरोत् । तस्य मन्त्रः आसीत् - 'ओम् नमो भगवते वासुदेवाय' ध्रुवस्य तपसा प्रसन्नो भूत्वा भगवान् विष्णुः तस्य समक्षं प्रकटीभूतः ईप्सितं वरं च प्रादात् ।

ध्रुवः स्वर्गलोके अचलं पदं प्राप्तवान् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दार्थाः

अपरा	- दूसरी	अतीव	- बहुत
अङ्के	- गोद में	निधाय	- बैठाकर
स्थातुम् ऐच्छत्	- बैठने की इच्छा किया	अब्रवीत्	- बोली
वत्स	- पुत्र	आरोढुम्	- चढ़ने के लिए
यतः	- क्योंकि	तर्हि	- तो
कुक्षौ	- कोख में	आगत्य	- आ करके
गृहाण	- ले लो	श्रुत्वा	- सुनकर
पार्श्वे	- पास में	आरभत	- आरम्भ कर दिया
आकर्ण्य	- सुनकर	तूष्णीं भूत्वा	- चुप रह कर
कदापि	- कभी भी	अत्रान्तरे	- इसी बीच में
अन्यान्	- दूसरों को	प्रताड़ितः	- दुखी किया गया
खिन्न	- दुःखी	परार्थे	- दूसरे के हित के लिये
पराम्	- श्रेष्ठ, उत्तम	प्राप्नोति	- प्राप्त करता है
अलभन्त	- प्राप्त किये	प्रादात्	- दिया, प्रदान किया
प्रासादम्	- महल	प्रकटीभूतः	- प्रकट हुए (उपस्थित हुए)
त्यक्त्वा	- छोड़कर	ईप्सितम्	- इच्छित

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यासः

1. अधोलिखित प्रश्नों के उत्तर संस्कृत भाषा में लिखिए-

1. राज्ञः उत्तानपादस्य कति पत्न्यौ आस्ताम् ?
2. ध्रुवस्य मातुः किं नाम ?
3. ध्रुवस्य माता किं कर्तुम् आदिदेश ?
4. ध्रुवस्य विमातुः नाम किम् ?

2. रिक्त स्थानों की पूर्ति कीजिए ।

1. सुनीतेः पुत्रः ..... आसीत् ।
2. ध्रुवः तपस्यां कर्तुं ..... अगच्छत् ।
3. वने ..... तपः अकरोत् ।
4. रुदन् ध्रुवः मातुः सुनीतेः .....।

3. संस्कृत में अनुवाद कीजिए -

1. उत्तानपाद एक राजा था ।
2. सुरुचि उनकी प्रिय रानी थी ।
3. ध्रुव भगवान का भक्त था ।
4. ध्रुव नारायण को प्रणाम करता है ।
5. ध्रुव ने अचल पद प्राप्त किया ।

PF664E

4. निम्नलिखित शब्दों से संस्कृत वाक्य बनाइए -

1. ध्रुवः
2. उत्तानपादः
3. सुरुचि
4. सुनीतिः
5. अब्रवीत्
6. अस्ति

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PFF262

8. आधुनिकयुगस्य आविष्काराः

1. शीतलकं यन्त्रम्

अधुना विज्ञानेन अति उन्नतिः कृता । तेषु शीतलकं यन्त्रं प्रथममस्ति। जनाः अस्य महतीं आवश्यकतां प्रतिगृहम् अनुभवन्ति । ग्रीष्मकाले च अस्य महती उपयोगिता परिलक्ष्यते।



शीतलकयन्त्रम्

2. सङ्गणकयन्त्रम्

अस्मिन् युगे संगणकयन्त्रस्य उपयोगः सर्वेषु क्षेत्रेषु दृश्यते । अनेन यन्त्रेणक्रान्तिकारि परिवर्तनम् अभवत् । अद्य शिक्षाक्षेत्रे अस्य महती आवश्यकता वर्तते । देशविदेशानां समाचारम् इन्टरनेट माध्यमेन प्रेषयितुं समर्थः अयं सङ्गणकः। अधुना सङ्गणकस्य उपयोगिता वर्तते ।

सङ्गणकयन्त्रम्

3. वायुयानम्

एतद् वायुयानम् अस्ति । वायुयानं शीघ्रगामि भवति । अति द्रुतगत्याः गगने उड्डयति । जनाः अनेन वायुयानेन दूरस्थानपर्यन्तं गन्तुं शक्नुवन्ति ।

वायुयानम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

4. दूरदर्शनम्

सम्पर्कसाधनेषु दूरदर्शनम् अत्याधुनिकसाधनम् अस्ति । प्रतिदिनं वयं नूतनसमाचारं प्राप्नुमः । विविधविषयाणां सूचनां दूरदर्शनं सूचयति यथा - क्रीड़ा-शिक्षा-विज्ञान-कृषि-व्यवसायादीनां विषयाणां समाचारः शीघ्रमेव जनैः प्राप्तुं शक्यते ।



दूरदर्शनम्

5. रेडियो यन्त्रम्

रेडियो यन्त्रेण विविध समाचाराः भाषणानि गीतानि च श्रूयन्ते । अस्माभिः अनेन यन्त्रेण अनेके शैक्षिककार्यक्रमाः वैज्ञानिकप्रयोगाः च ज्ञायन्ते ।

रेडियो यन्त्रम्

7. चलितदूरभाषयन्त्रम्

एतद् आधुनिकं -चलित - दूरभाष-यन्त्रम् (मोबाईल) येन माध्यमेन कस्मिंश्चिदपि स्थाने विद्यमानाः जनाः स्वमित्रैः सह वार्तालापं कर्तुं शक्नुवन्ति । अस्य यन्त्रस्य ध्वनिः अतिमधुरा प्रतीयते । (जनाः) एतद् यन्त्रं कोटरिकायां स्थापयन्ति । कोटरिकारतः बहि निःसार्य कर्णस्थले आनीय जनैः स्वजनेन, स्वमित्रेण, स्वबन्धुना सह वार्तालापः क्रियते । अस्य यन्त्रस्य उपयोगिता अधुना सर्वेषु क्षेत्रेषु अनवरतं भवति ।

चलित दूरभाष यन्त्रम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वयं अनेन यन्त्रमाध्यमेन लिखित-संदेशं-अभिनन्दन पत्रं च प्रेषयितुं शक्नुमः । बालक-बालिकाश्च क्रीडन्तः आनन्दमनुभवन्ति । एतद् यन्त्रम् इन्टरनेटमाध्यमेन अभिनन्दनपत्रं, शोकपत्रं, संदेशपत्रं अन्यंमहत्वपूर्ण समाचारं प्रेषयितुं समर्थम् । अधुना अस्य यन्त्रस्य अति उपयोगितास्ति । अतः एतद् यन्त्रंलोकप्रियम् अस्ति ।

शब्दार्थाः

अधुना	-	आजकल
प्रतिगृहम्	-	घर-घर में ।
अनुभवन्ति	-	अनुभव करते हैं ।
सङ्गणकयन्त्रम्	-	कम्प्यूटर यन्त्र ।
देशविदेशानाम्	-	देश विदेशों का ।
प्रेषयितुम्	-	भेजने के लिये ।
वायुयानम्	-	हवाई जहाज ।
गगने	-	आकाश में ।
उड्डयति	-	उड़ता है ।
शक्नुवन्ति	-	समर्थ होते हैं ।
प्राप्नुमः	-	प्राप्त करते हैं ।
सूचयति	-	सूचित करता है ।
ज्ञायन्ते	-	ज्ञात होते हैं ।
चलितदूरभाषयंत्रम्	-	चलित टेलीफोन (मोबाईल)
कोटरिका	-	जेब (पॉकेट)
निःसार्य	-	निकालकर
आनीय	-	लाकर
वार्तालापः	-	बातचीत
क्रियते	-	किया जाता है ।
अनवरतम्	-	लगातार ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यासः

1. निम्नलिखित प्रश्नों का संस्कृत में उत्तर दीजिए ।

1. अधुना केन यन्त्रेण क्रान्तिकारिपरिवर्तनम् अभवत् ?
2. किं यानं गगने द्रुतगत्याः उड्डयति ?
3. दूरदर्शनं किं सूचयति ?
4. अस्माभिः रेडियोयन्त्रेण कानि-कानि श्रूयन्ते ?
5. कस्य यन्त्रस्य ध्वनिः मधुरा प्रतीयते ?

2. रिक्त स्थान की पूर्ति कीजिए ।

1. ..... महतीं आवश्यकतां प्रतिगृहम् अनुभवन्ति ।
2. वायुयान् ..... भवति ।
3. विविध विषयानां सूचनां ..... सूचयति ।
4. रेडियो यन्त्रेण ..... श्रूयते ।
5. चलित दूरभाष यन्त्रं ..... स्थापयन्ति ।

3. युग्म बनाइए-

1.	चलित दूरभाष यन्त्रम्	-	शीघ्रकार्ययन्त्रम्
2.	सङ्गणक यन्त्रम्	-	दृश्य-श्रव्य यन्त्रम्
3.	रेडियो यन्त्रम्	-	आकाशगामी यन्त्रम्
4.	वायुयानम्	-	श्रवणम्
5.	दूरदर्शनम्	-	श्रव्यभाषण यन्त्रम्

4. 'इदम्' पुल्लिङ्ग सर्वनाम शब्द की कारक रचना लिखिये।
5. 'भू' (भव्) धातु का लट्लकार परस्मैपद में रूप चलाइये ।

PFNX7P

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PFXT9C

9. मेलापकः

अहमदः - मोहन ! अद्य तु तव वेशः अतीव सुन्दरः अस्ति । कथय, कथं नवीनानि वस्त्राणि धारयसि ?

मोहनः - अहमद ! किं त्वं न जानासि, यद् अद्य अस्माकं ग्रामे विजयदशम्याः मेलापकः अस्ति । अद्य अहं तत्र गच्छामि । ग्रामस्य अन्ये बालकः बालिकाः अपि तत्र गमिष्यन्ति । किं त्वं मया सह न चलिष्यसि ?

अहमदः - मोहन ! अयं तु महान् सुअवसरः अस्ति । वद तत्र किं भविष्यति ?

मोहनः - भ्रातः ! तत्र महान् जनसम्मर्दः भविष्यति । तत्र आवां विविधानि दृश्यानि द्रक्ष्यावः । रामरावणयोः युद्धस्य अभिनयः अपि तत्र भविष्यति ।

अहमदः - कीदृशं युद्धं सुस्पष्टं कथय ? किं तत्र रामलीला भविष्यति?

मोहनः - आम् तावत् त्वं तु जानासि एव । पुनः किं पृच्छसि ? अतः त्वम् अपि सज्जितः भव ।

अहमदः - क्षणं विरम, अहम् अपि सज्जितः भवामि । स्मरामि गत वर्षे अपि अहं मातुलग्रामे रामलीलाम् अपश्यम्। तत्र ऋक्षराजजाम्बवतः अभिनयः अति मनोहरः आसीत् । अन्यानि अपि बहूनि दृश्यानि मनोहराणि आसन् । तत्र अहम् अवश्यमेव गमिष्यामि ।

मोहनः - आगच्छ, आवां चलावः ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यासः

निम्नांकित प्रश्नों के उत्तर संस्कृत भाषा में लिखिए ।

1. मेलापकः कुत्र अभवत् ?
2. ऋक्षराजजाम्बवतः अभिनयः कीदृशः आसीत् ?
3. तत्र के गमिष्यन्ति ?
4. तत्र कः अवश्यमेव गमिष्यति ?

संस्कृत में अनुवाद कीजिए -

1. हमारे देश में बहुत से मेले होते हैं ।
2. उनमें विजयदशमी का मुख्य स्थान है ।
3. हम दोनों मेला देखने जायेंगे ।
4. गतवर्ष भी हमारे गांव में मेला हुआ था ।
5. मेले में राम-रावण के युद्ध का दृश्य होगा ।

रिक्त स्थानों की पूर्ति कीजिए -

1. तत्र आवां ..... द्रक्ष्यावः ।
2. गतवर्षे अपि ..... मातुल ग्रामे ..... अपश्यम् ।
3. तत्र ..... अवश्यमेव गमिष्यामि ।
4. क्षणं विरम्, अहम् अपि ..... भवामि ।
5. राम-रावणयोः युद्धस्य ..... अपि तत्र भविष्यति ।

शब्दार्थाः

मेलापकः	-	मेला
विविधानि	-	अनेक प्रकार के
जनसम्मर्दः	-	भीड़
सज्जितः	-	तैयार

PG7PAZ

'अवसर' में 'सु' उपसर्ग जोड़कर 'सुअवसर' शब्द बनता है, जिसका अर्थ है अच्छा मौका, इसी प्रकार 'स्पष्ट' में सु जोड़कर 'सुस्पष्ट' शब्द बना, इसका भी अर्थ हुआ अच्छी प्रकार से स्पष्ट (व्यक्त) ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

10. बालगीतम्

(प्रस्तुत पाठ गेय है । हम स्वाभिमानी बने स्वयं भी प्रसन्न रहें और संसार में भी प्रसन्नता फैलाएं । दीन दुखियों और अनाथों का सहारा बने यही इस गीत का भाव है । आइए इसे स्वर और लय सहित गाएँ ।)

मा कुरु दर्पं मा कुरु गर्वम्
मा भव मानी, मानय सर्वम् ।
मा भज दैन्यं, मा भज शोकम्
मुदितमना भव मोदय लोकम् ॥

मा वद मिथ्यां मा वद व्यर्थम्,
न चल कुमार्गे, न कुरु अनर्थम्
पाहि अनाथं, पालय दीनम्
लालय जननीजनक-विहीनम् ॥

शब्दार्थाः

मा	= मत	मानय	= आदर करो
दर्पम्	= घमण्ड को	दैन्यम्	= दीनता को
भव	= बनो	भज	= ग्रहण करो
मान	= अभिमानी	मुदितमना	= प्रसन्न मन वाले
मोदय	= प्रसन्न करो	मिथ्या	= झूठ
पाहि	= रक्षा करो	जननीजनकविहीनम्	= माता पिता से वंचित

अभ्यास प्रश्नाः

प्रश्न (1) अधोलिखित में कर्म जोड़िए -

(क) ..... मोदय ।
(ख) ..... पाहि ।
(ग) ..... पालय ।
(घ) ..... मानय ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रश्न (2) अधोलिखित शब्दों को विलोम शब्दों के साथ मिलाइए -

(1) सनाथः - शोकः

(2) सुमार्गः - मिथ्या

(3) हर्षः - अनाथः

(4) सत्यम् - मानी

(5) नम्रः - कुमार्गः

प्रश्न (3) अधोलिखित वाक्यों में अव्यय शब्द भरिए -

मिथ्या ..... वद ।

कुमार्गे ..... चल ।

..... मा वद ।

दर्पं ..... कुरु ।

प्रश्न (4) अधोलिखित पङ्क्तियों को गीत के क्रम में लिखिए -

(1) लालय जननीजनक विहीनम् ।

(2) मा भज दैन्यं मा भज शोकम् ।

(3) मा भव मानी मानय सर्वम् ।

(4) पाहि अनाथं, पालय दीनम् ।

(5) मा कुरु दर्पं, मा कुरु गर्वम् ।

(6) मुदितमना भव मोदय लोकम् ।

(7) न चलु कुमार्गे न कुरु अनर्थम् ।

(8) मा वद मिथ्या, मा वद व्यर्थम् ।

(संकलित - संस्कृत धारा राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद् नई दिल्ली)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PGZCFX

11. शृंङ्गिऋषेः नगरी

छत्तीसगढराजस्य पूर्वदिशि धमतरीजिलान्तर्गतं सिहावानगरी विद्यते । पर्वतस्य सघनगुहाभिः विविधैः मठैः च आच्छादिता इयं नगरी प्रसिद्धा । पर्वतस्योपरिभागे शृंङ्गिऋषेः आश्रमः अस्ति । शृंङ्गिऋषेः धर्मपत्नी शान्तादेवी अपि अस्मिन् पर्वते विराजते ।

पर्वतस्य गुहायां शक्तिस्वरूपिणी दुर्गा प्रतिष्ठिता । अस्य क्षेत्रस्य इयं सिहावानगरी प्रयागः इति अभिधीयते। सिहावाक्षेत्रस्य समीपे सांकरा नाम ग्रामः अस्ति । यत्र दन्तेश्वरीमाता बस्तरराज्ञः कुलदेवी इति ख्यातिं प्राप्ता । नगरवासिनः देवीं दन्तेश्वरीं शक्तिस्वरूपां मन्यन्ते । अत्रैव शक्तिस्वरूपा सतीमाई गादीमाई च विराजेते । ग्रामदेवता ठाकुरदेवः अपि जनैः पूज्यते । सघनवनानां मध्ये प्रतिष्ठिता देवीकालिका खल्लारीग्रामान्तर्गतं विद्यते । अत्र आगन्तुकाः श्रद्धालुजनाः स्वकामनाप्राप्त्यर्थं देवीं प्रार्थयन्ते । देवीकालिका तेषाम् आकांक्षाः पूरयति ।

देवीकालिका न केवलं छत्तीसगढ राज्ये प्रत्युत सर्वत्र प्रसिद्धा । अत्र कर्णेश्वरधाम - स्वविपुलसांस्कृतिक-सम्पदाभिः परिपूर्णम् अस्ति । भौगोलिक-प्राकृतिक-आदिम-संस्कृति-पुरातात्विक-सम्पदानां निधिः सप्तऋषीनां स्थली च इयं सिहावानगरी छत्तीसगढराज्ये अतिप्रसिद्धा ।

शब्दार्थाः

पर्वतस्य	-	पर्वत का	प्राप्त्यर्थम्	-	प्राप्ति के लिये
उपरिभागे	-	उपर भाग में	प्रार्थयन्ते	-	प्रार्थना करते हैं
विराजते	-	विद्यमान है	नगरवासिनः	-	नगरवासी लोग
अभिधीयते	-	कहते हैं	सम्पदानां निधि	-	सम्पदाओं का भण्डार
मन्यन्ते	-	मानते हैं			

अभ्यासः

1. निम्नांकित प्रश्नों के उत्तर संस्कृत में दीजिए ।

1. शक्तिस्वरूपा दुर्गा कुत्र प्रतिष्ठिता ?
2. सिहावाक्षेत्रं किम् अभिधीयते ?
3. सघनवनानां मध्ये खल्लारीग्रामान्तर्गतं का देवी विद्यते ?
4. सप्तऋषीनां तपस्थली का अस्ति ?

2. रिक्त स्थानों की पूर्ति कीजिए ।

PH98HK

1. सिहावाक्षेत्रस्य समीपे ..... ग्रामः अस्ति ।
2. पर्वतस्य गुहायां ..... प्रतिष्ठिता ।
3. बस्तरराज्ञः ..... इति ख्याति प्राप्ता ।
4. ..... केवलं छत्तीसगढराज्ये न ख्याता प्रत्युत विश्वप्रसिद्धा ।

3. अस् धातु के लट्, लृट और लङ् लकार के सभी रूप लिखिये ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

PHI4J8

12. अस्माकम् आहारः

अस्मिन् संसारे सर्वे प्राणिनः आहारं गृह्णन्ति । जीवनरक्षार्थम् आहारस्य अतीव आवश्यकता भवति ।

मानवस्य आहारः कीदृशः भवेत् इति विषये अस्माकं ऋषयः मुनयः वैद्याश्च उपदिशन्ति यत् बाल्यकालात् वृद्धावस्थापर्यन्तम् अस्माकम् आहारः सन्तुलितः भवेत् । सद्यः प्रसूतः शिशुः मातुः दुग्धमेव पिबति । मातुर्दुग्धं पौष्टिकं भवति । पौष्टिक-आहारेण शिशवः संवर्ध्यन्ते । सर्व-जनेभ्यः आहारे पौष्टिक फलानां महती आवश्यकता वर्तते अन्यथा ते दुर्बलाः अशक्ताश्च भविष्यन्ति ।

अस्माकम् आहारः उष्णम्, स्निग्धः, स्वादयुक्तः च भवेत् । मानवः मितभोगी भवेत् अन्यथा अजीर्णं भविष्यति, वैद्याः कथयन्ति-'अजीर्णमन्नं रोगस्य कारणमस्ति । प्रसन्नचित्तेन स्वच्छस्थाने संयमेन उपविश्य नात्यधिकं नातिद्रुतम् आहारं कुर्यात् ।

चणकः तण्डुलः, गोधूमः, द्विद्वलं, यवः, आढकी, मुद्गः, माषः इत्यादीनि अन्नानि सन्ति । कूष्माण्डकः, कर्कटी, अलाबूः, मूलिका, आम्रम्, इक्षुः, कदलीफलं इत्यादीनि शाकफलानि सन्ति । नवनीतं दुग्धं, घृतं, तक्रं, दधि इत्यादिकं पेयम् अस्ति । एते सर्वे शाकाहारि-मानवानाम् आहाराः ।

बालानां कृते दुग्धम् अमृतं कथ्यते । घृतं तु बलवर्धकम् । मधु रक्त-शोधनं करोति ।श्रीफलम् आमलकः, आमरूद्यः स्वास्थ्यं रक्षन्ति, उदर-शोधनं बलवर्धनं च कुर्वन्ति । उक्तञ्च-आहार-शास्त्रे ''शाकाहारी मनुष्यः दीर्घायुः भवति ।''

शब्दार्थाः

सर्वे प्राणिनः	-	सभीप्राणी
गृह्णन्ति	-	ग्रहण करते हैं
प्राणरक्षार्थम्	-	प्राण रक्षा के लिये

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कीदृशः	-	कैसा
उपदिशन्ति	-	उपदेश देते हैं
यत्	-	कि
सद्यः प्रसूतः	-	तुरन्त पैदा हुआ
शिशुः	-	बालक
एव	-	ही
पौष्टिकम्	-	बल बढ़ाने वाला
संवर्धयन्ते	-	बढ़ते हैं
अशक्ताः	-	शक्तिहीन
उष्णम्	-	गर्म, ताजा
स्निग्धः	-	चिकना
स्वादयुक्तः	-	स्वादिष्ट
मितभोगी	-	कम खाने वाला
अजीर्णम्	-	अपच
संयमेन	-	संयमपूर्वक
उपविश्य	-	बैठकर
अतिद्रुतम्	-	बहुत शीघ्र
न	-	नहीं
चणकः	-	चना
तण्डुलः	-	चावल
गोधूमः	-	गेहूं
द्विदलम्	-	दाल
यवः	-	जौ
आढकी	-	अरहर की दाल
मुद्गः	-	मूंग
माषः	-	उड़द
इक्षुः	-	ईख
कूष्माण्डकः	-	कुम्हड़ा
अलाबूः	-	आलू
मूलिका	-	मूली

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कदलीफलम्	-	केला
नवनीतम्	-	मक्खन
तक्रम्	-	मही(मट्ठा)
दधि	-	दही
पेयम्	-	पीने योग्य
एते	-	ये
कृते	-	के लिये
कथ्यते	-	कहा जाता है
रक्तशोधनम्	-	खून को शुद्ध करना
श्रीफलम्	-	नारियल
आमलकः	-	आंवला
आमरूद्यः	-	अमरूद
उक्तम्	-	कहा गया है
च	-	और

संधि-विच्छेद

वैद्याश्च	-	वैद्याः + च
मातुर्दुग्धम्	-	मातुः + दुग्धम्
फलादीनाम्	-	फल + आदीनाम्
अशक्ताश्च	-	अशक्ताः + च
नात्यधिकम्	-	न + अतिअधिकम्
नातिद्रुतम्	-	न + अतिद्रुतम्
इत्यादीनि	-	इति + आदीनि
इत्यादिकम्	-	इति + आदिकम्
उक्तञ्च	-	उक्तम् + च
दीर्घायुः	-	दीर्घ + आयुः
भवतीति	-	भवति + इति

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यासः

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए-

1. प्राणरक्षार्थं कस्य अतीव आवश्यकता वर्तते ?
